तर्हिष्यन्-न्ती-ती, तर्हयिष्यन्-न्ती-ती, तितर्हिषिष्यन्-न्ती-ती ; —

— तर्हयमाणः, तर्हयिष्यमाणः — तरीतृह्यमाणः, तरीतृहिष्यमाणः ;

[1]तृट्-तृड्-तृहौ-तृहः ; — — —

तृहितम्-तः-तवान्, तर्हितः, तितर्हिषितः, तरीतृहितः-तवान् ;

तृहः, तर्हः, तितर्हिषुः, तरीतर्हः ;

तर्हितव्यम्, तर्हयितव्यम्, तितर्हिषितव्यम्, तरीतृहितव्यम् ;

तर्हणीयम्, तर्हणीयम्, तितर्हिषणीयम्, तरीतृहणीयम् ;

[2]तृह्यम्, तर्ह्यम्, तितर्हिष्यम्, तरीतृह्यम् ;

ईषत्तर्हः-दुस्तर्हः-सुतर्हः ; — — —

तृह्यमाणः, तर्ह्यमाणः, तितर्हिष्यमाणः, तरीतृह्यमाणः ;

तर्हः, तर्हः, तितर्हिषः, तरीतृहः ;

तर्हितुम्, तर्हयितुम्, तितर्हिषितुम्, तरीतृहितुम् ;

[3]तृढिः, तर्हणा, तितर्हिषा, तरीतृहा ;

तर्हणम्, तर्हणम्, तितर्हिषणम्, तरीतृहणम् ;

[4]तर्हित्वा, तर्हयित्वा, तितर्हिषित्वा, तरीतृहित्वा ;

प्रतृह्य, प्रतर्ह्य, प्रतितर्हिष्य, प्रतरीतृह्य ;

तर्हम् २, } तर्हम् २, } तितर्हिषम् २, } तरीतृहम् २ ; }
तर्हित्वा २, } तर्हयित्वा २, } तितर्हिषित्वा २, } तरीतृहित्वा २. }

## (777) "तृहू हिंसायाम्" (VI-तुदादिः-1348. सक. वेट्. पर.)

'श्रे तृणेढीति हिंसायाम्, तृहतीत्यूदितस्तृहेः ॥' (श्लो. 195) देवः ।

तर्हकः-र्हिका, तर्हकः-र्हिका, [5]तितर्हिषकः-षिका, तितृक्षकः-क्षिका,
तरीतृहकः-हिका ;

---

1. क्विपि, 'हो ढः' (8-2-31) इति ढत्वे, जश्त्वचर्त्वयो रूपम् ।
2. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति भावकर्मणोः क्यप् ।
3. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, ढत्वधत्वष्टुत्वढलोपाः ।
4. 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधाद् गुणः ।
5. 'स्वरतिसूतिसूयतिधूञूदितो वा' (7-2-44) इति इड्विकल्पः । इडभावपक्षे 'इको झल्' (1-2-9) इति सनः कित्त्वम् । 'हो ढः' (8-2-31) इति ढत्वे, 'षढोः कः सि' (8-2-41) इति ढकारस्य ककारे, 'इण्कोः' (8-3-57) इति षत्वे च रूपम् । एवमिडभावपक्षे सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया ।